20.09.20
2

२१
पैत्र्यमानम् —

आचार्यभास्करेण प्रोक्तं चान्द्रमासमेव पितृणाम् अहोरात्रं भवति। तद्यथा— "विधोर्मास एतच्च पैत्रं द्युरात्रम्"। सौरसिद्धान्ते प्रोक्तं—

त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम्।
निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः॥

अर्थात् त्रिंशत्तिथिभिः एको चान्द्रमासो भवति तदेव विधूर्ध्वभागस्थितानां पितृणां दिनं रात्रिश्च भवति। अत्रोक्तं यत् — मासपक्षान्तौ विभागतः, अर्थात् मासान्त = दर्शान्तः, पक्षान्तः = पूर्णिमान्तः, एवं दर्शान्ते पितृणां दिनार्धकालः, पूर्णिमान्ते तेषां रात्र्यर्धकालो भवति। एव-मत्र सुवण्याधारेण निर्गलितार्थः यत् — कृष्णपक्ष-सार्धसप्तम्यां पितृणां दिनारम्भः एवञ्च शुक्लपक्ष-सार्धसप्तम्यां निशारम्भः भवति, पूर्ववदेव रीत्या मास-वर्षादयः सिद्धयन्ति।

यद्यपि भास्कराचार्यः पितृणां निवासो चन्द्र-स्योर्ध्वभागो मन्यते, एवमेव मन्तुडैः सह पितृमाने अन्तरं भजते। यथोक्तं —

विधोर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति।
पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे दर्शे यतोऽस्माद्द्युदलं तदैषाम्॥
भार्धान्तरत्वान्न विधोरधःस्थं तस्मान्निशीथः खलु पौर्णमास्याम्।
कृष्णे रविः पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम्॥

शास्त्री-I

20.09.20
1

सौरमानम् —

सूर्येण समुत्पन्नमानमेव सौरनाम्ना व्यवह्रियते। अर्थात् सूर्यस्येदं सौरमिति।

अत्र सूर्यो हि यावता कालेन क्रान्तिवृत्तस्यैकांश-भोगं प्रकुरुते तावान् कालः सौरदिनमिति। रवेश्च स्वपूर्वगत्या गच्छन् अश्विन्यादिबिन्दुमारभ्य पुनर्यदा तद्बिन्दुमागच्छति तदेकं सौरवर्षं मन्यते। यथाह भास्करः-

'रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं' तत्र वासनाभाष्ये प्राप्यते यत्- रविर्यावता कालेन पूर्वगत्या मेषादि-भचक्रं भ्रमति तावत्प्रमाणं रविवर्षं प्रदिष्टम्, त्रिंशदंशोऽर्कदिनम् इति।

सौरमानस्य व्यवहारे प्राप्यते यत्—

सौरेण द्युनिशोर्मानं षडशीतिमुखानि च।
अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता॥

डॉ० सुदिष्ट कुमार
सहा० प्राध्यापक (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ।

दिव्यमानम् ——

दिवि भवं दिव्यमिति देवसम्बन्धिकालमानमेवार्थः। देवाः सुमेरौ निवसन्ति एवञ्च दैत्याः कुमेरौ निवसन्ति, इति पुराणादिषु प्रसिद्धमस्ति। ज्योतिषशास्त्रेऽपि देवानां दैत्यानां संस्थितिः वर्णिता वर्तते। तद्यथा—

सौम्ययाम्ये ध्रुवस्थाने खमध्ये देवदैत्ययोः।

वस्तुतस्तु 'दिनं दिनेशस्य यतोऽत्र दर्शने तमी तमो हन्तुरदर्शने सति' इति दिनरात्रिपरिभाषया क्षितिजोर्ध्वस्थे रवौ दिनं एवञ्च क्षितिजादधःस्थे रवौ रात्रिर्भवति। एवं ध्रुवस्थदेवादीनां खमध्यतः नवत्यंशेन विहितवृत्तं नाडीवृत्तमेव देवदैत्ययोः क्षितिजवृत्तं भवति। एवं मेषादिषड्राशिसञ्चरन्तमर्कं देवाः पश्यन्ति, अतस्तेषां दिनं तुलादिषड्-राशिस्थितरविं दैत्याः पश्यन्ति, अतस्तेषां दिनम् एवं विपरीत क्रमेण रात्रिर्भवति। यदा देवानां दिनं तदा दैत्यानां रात्रिः, एवञ्च यदा दैत्यानां दिनं तदा देवानां रात्रिर्भवति। अतएव दिव्यदिन-प्रसङ्गे सौरसिद्धान्ते प्रोच्यते "मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते।

अर्थात् द्वादशसौरमासैः एकं दिव्यं दिनं भवति, ततः त्रिंशद्भिः दिवसैः मासं एवञ्च द्वादशमासैः दिव्य वर्षं सम्पद्यते।

डॉ० खुदिवर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।

## गौरवमानम् —

गौरवमानस्य निर्माणं गुरुराशिसञ्चारवशेन भवति 'बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिका वदन्ति' इति भास्करोक्तवचनाद् 'मध्यगत्या भभोगेन गुरोर्गौरववत्सराः' इति वशिष्ठवचनात् च मध्यम-बृहस्पतेरेकराशिभोगकालो गौरवं वर्षं भवति। षष्टिसंवत्सराणां व्यवहारोऽपि अनेनैव भवति। सूर्यसिद्धान्तमतेन गुरोर्मध्यमगत्या राशिभोगकालो गौरववर्षं कथ्यते। अत्र विजयादिषष्टिसंवत्सराणां क्रमः सिद्ध्यति। एतद्धि द्वादशवर्षीयसंवत्सरचक्रं विद्यते।

द्वादशवर्षीयचक्रे गुरोर्मध्यमगत्या क्रमशो मेष-वृषादिराशिभोगे आश्विन-कार्तिक्यादिसंवत्सरा भवन्ति। विभिन्नमतानुसारमत्र गुरोरेकराशिभोगमानं प्रदर्श्यते—

सूर्यसिद्धान्ते - 361।1।36।11 कुदिनानि।
ब्राह्मसिद्धान्ते - 361।1।1।21। कुदिनानि।
आर्यभटीये - 361।1।1।37।5 कुदिनानि।
आधुनिकवेधे - 361।2।55।26 कुदिनानि।